# Jharkhand Council of Educational Research and Training, Ranchi

# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् ,राँची

## MODEL QUESTION PAPER

## मॉडल प्रश्न पत्र

Session: 2025-26 (सत्र: 2025-26)

| Class – 10<br>(वर्ग-10) | Subject – Sanskrit<br>(विषय- संस्कृत) | F. M. – 80<br>(पूर्णांक- 80) | Time – 3 Hours<br>(समय-3 घंटा) |
|---|---|---|---|

**Instructions / निर्देश :**

1. **Examinees are required to answer in their own words as far as practicable. The booklet contains 13 printed pages.**

**परीक्षार्थी यथासंभव अपने शब्दों में ही उत्तर दें। पुस्तिका में 13 मुद्रित पृष्ठ है ।**

2. **This question paper has four sections: A, B, C, and D. The total number of questions is 52.**

**इस प्रश्न पत्र में चार खण्ड - A, B, C, एवं D है। कुल प्रश्नों की संख्या 52 है।**

3. **There are 30 multiple-choice questions in Section A. Four options are given for each question, choose one of the correct options. Each question carries 1 marks.**

**खण्ड A में कुल 30 बहुविकल्पीय प्रश्न हैं। प्रत्येक प्रश्न के चार विकल्प दिए गए हैं, इनमें से एक सही विकल्प का चयन कीजिए। प्रत्येक प्रश्न का मान 1 अंक निर्धारित है।**

4. **Section B – Question numbers 31 – 38 are very short answer type. Answer any six of these questions. Each question carries 2 marks.**

**खण्ड B में प्रश्न संख्या 31-38 अति लघु उत्तरीय प्रश्न हैं। इनमें से किन्ही छह प्रश्नों के उत्तर दीजिए। प्रत्येक प्रश्न का मान 2 अंक निर्धारित है।**

5. **Section C – Question numbers 39 – 46 are short answer type. Answer any six of these questions. Each question carries 3 marks.**

**खण्ड C में प्रश्न संख्या 39-46 लघु उत्तरीय प्रश्न हैं। इनमें से किन्ही छह प्रश्नों के उत्तर दीजिए। प्रत्येक प्रश्न का मान 3 अंक निर्धारित है।**

6. **Section D – Question numbers 47 – 52 are long answer type. Answer any four of these questions. Each question carries 5 marks.**

   **खण्ड D में प्रश्न संख्या 47 - 52 दीर्घ उत्तरीय प्रश्न हैं। इनमें से किन्ही चार प्रश्नों के उत्तर दीजिए। प्रत्येक प्रश्न का मान 5 अंक निर्धारित है।**

## खण्डः - क

**अस्मिन् खण्डे त्रिंशत् (30) बहुविकल्पीयाः प्रश्नाः सन्ति। सर्वे प्रश्नाः अनिवार्याः सन्ति। (इस खण्ड में 30 बहुविकल्पीय प्रश्न हैं। सभी प्रश्न अनिवार्य हैं।)**

**(1x30=30)**

### अपठितांश-अवबोधनम्

**अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् विकल्पेभ्यः समुचितमुत्तरं चिनुत-**

सङ्गणकविशेषज्ञानुसारेण संस्कृतभाषा सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदास-सदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणी अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति। भारतसर्वकारस्य राजचिह्न प्रयुक्तां सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति। एतमेव राष्ट्रिय शैक्षिकानुसन्धानप्रशिक्षण-परिषदः ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

**प्रश्नाः**

1. **सङ्गणकस्य कृते का भाषा सर्वोत्तमा विद्यते**?

क. हिंदीभाषा ख. संस्कृतभाषा ग. आंग्लभाषा घ. तमिलभाषा

**2. गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं कः अकरोत्?**

क. सुश्रुतः ख. चरकः ग. कालिदास: घ. भास्कराचार्य:

**3. भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः केन रूपेण स्वीकृताः सन्ति?**

क. समृद्धिरूपेण  ख. ध्येयवाक्यरूपेण  ग. वीरतारूपेण  घ. विजयीवाक्यरूपेण

**4. 'सर्वोत्तमा' इति विशेषणस्य विशेष्यपदं गद्यांशे किमस्ति**?

क. भाषा  ख. वाङ्मयम्  ग. संस्कृतम्  घ. सूक्तिः

**5. 'संसारे' इति पदस्य गद्यांशात् पर्यायपदं चित्वा लिखत।**

क. भुवने  ख. विश्वे  ग. जगति  घ. लोके

## पठितांश-अवबोधनम्

**अधोलिखितं गद्यांशं, पद्यं, संवादांशं च पठित्वा प्रदत्तप्रश्नान् विकल्पेभ्य: समुचितमुत्तरं चिनुत-**

**गद्यांश:**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूदवा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवल: तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।

**प्रश्नाः**

**6. कृषकः किं कुर्वन् आसीत्?**

क. क्षेत्रकर्षणं  ख. बीजारोपणं  ग. वस्त्रप्रक्षालनं  घ. मृत्तिकाखननं

**7. बलीवर्दयोः एकः केन दुर्बलः आसीत्**?

क. हस्तेन  ख. नेत्रेण  ग. पादेन  घ. शरीरेण

**8. भूमौ पतिते स्वपुत्रं दृष्ट्वा कस्य नेत्राभ्यामश्रूणि आविरासन्?**

क. सुरभे:  ख. पुत्रस्य  ग. पितु:  घ. कृषकस्य

**9. वृषभः कुत्र पपात?**

क. गृहे ख. उद्याने ग. क्षेत्रे घ. वने

**10. 'गन्तुम्' इति पदे कः प्रत्यय:?**

क. क्त ख. ल्यप् ग. तुमुन् घ. क्त्वा

**पद्यम्**

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु:।**

**नास्त्युद्यमसमो बन्धु: कृत्वा यं नावसीदति।।**

**प्रश्नाः**

**11. मनुष्याणां शरीरस्थो महान् रिपु: कः?**

क. आलस्यम् ख. अनालस्यम् ग. वस्त्रम् घ. देहम्

**12. केन समः बन्धु: नास्ति?**

क. रिपुसमः ख. गुणसमः ग. उद्यमसमः घ. आलस्यसमः

**13. न + अवसीदति = ?**

क. नावसीदति ख. नावसीदती ग. नासीदति घ. नास्तीदति

**14. 'शत्रु:' इत्यस्य पर्यायपदं पद्ये किम् अस्ति?**

क. बन्धु: ख. रिपु: ग. महान् घ. मनुष्याणां

**15. 'अवसीदति' इति क्रियापदे कः लकारः?**

क. लट् ख. लोट् ग. लृट् घ. लङ्

**संवादांश:**

व्याघ्रः - गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते त्याहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं

तदग्रतः।

श्रृगाल: - व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः - प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कल्हायमानौ चपेटया प्रहरन्ती दृष्टा।

**प्रश्नाः**

16. **व्याघ्रः श्रृगालं कुत्र गन्तुं कथयति**?

क. नगरम् ख. गूढप्रदेशम् ग. वनम् घ. निजप्रदेशम्

**17. व्याघ्रः कस्मात् भीतः आसीत्**?

क. श्रृगालात् ख. जम्बुकात् ग. मानुषात् घ. व्याघ्रात्

**18. 'व्याघ्रमारीति' इति कुत्र श्रूयते?**

क. शास्त्रे ख. गृहे ग. नगरे घ. काव्ये

**19. हन्तुम् + आरब्धः = ?**

क. हन्तुमरब्धः ख. हन्तुरब्धः ग. हन्तुमारब्धा घ. हन्तुमारब्धः

**20. 'गच्छ' इति क्रियापदे कः लकारः**?

क. लङ् ख. लोट् ग. लृट् घ. लट्

**निर्देशः रेखांकितपदानि आधृत्य प्रश्ननिर्माणार्थं उचितविकल्पं चिनुत-**

**21. उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति**

क. कम् ख. कः ग. केषां घ. कुत्र

**22. शकटीयानम् <u>कज्जलमलिनं</u> धूमं मुञ्चति।**

क. कीदृशं ख. केन ग. कीदृशी घ. कम्

**23. <u>व्याघ्रं</u> दृष्टवा धूर्तः श्रृगालः अवदत्**

क. कुत्र    ख. कम्    ग. काम्   घ. कस्य

**24. <u>सुराधिपः</u> ताम् अपृच्छत्**

क. कीदृशः    ख. कः    ग. कस्य    घ. कया

**25. <u>धेनूनां</u> माता सुरभिः आसीत्**

क. काम्   ख. केषां    ग. कस्य    घ. कस्याः

**निर्देशानुसारम् उत्तरं चिनुत-**

**26. 'चक्षुभ्याम्' इत्यस्य पर्यायपदं किम्?**

क. पादाभ्याम्  ख. नेत्राभ्याम्  ग. बालकाभ्याम्  घ. कर्णाभ्याम्

**27. 'बुद्धिहीना' इत्यस्य विलोमपदं किम्?**

क. वृद्धिमती   ख. बुद्धिमान्   ग. बुद्धिमती    घ. मूर्खः

**28. 'बुद्धिर्बलवती सदा' पाठः कस्मात् ग्रन्थात् संकलितः**?

क. शुकसप्तति: तः  ख. लसल्लतिकातः   ग. कुन्दमालातः   घ. महाभारततः

**29. 'लसल्लतिका' इत्यस्य रचनाकारः कः**?

क. कालिदासः    ख. वेदव्यासः    ग. हरिदत्तशर्मा    घ. विष्णुशर्मा

**30. नाटककारदिङ्नागस्य रचना का**?

क. उत्तररामचरितम्   ख. कुन्दमाला    ग. लसल्लतिका   घ. महाभारतम्

**खण्ड: - ख**

(2 अङ्कीयाः प्रश्नाः)

**निर्देशः- अस्मिन् खण्डे अष्टप्रश्नाः सन्ति। केचन षट्प्रश्नानाम् उत्तराणि लिखन्तु-**

**अपठितांश:**

**अधोदत्तम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु-**

इदं हि विज्ञानप्रधानं युगम्। 'विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते। सम्प्रति मानवः प्रकृतिं वशीकृत्य तां स्वेच्छया कार्येषु नियुक्ते। तथाहि वैज्ञानिकैः अनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निघृणं च। अयं च न विज्ञानस्य ' दोषः न वा परमाणुशक्तेरपराधः, पुरुषापराधः खलु एषः। अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीयः।

**पूर्णवाक्येन उत्तरत-**

31. विशिष्टं ज्ञानं किं कथ्यते?
32. अधुना सर्वत्र कस्य प्रभावो दृश्यते?
33. कैः अनेके आविष्काराः विहिताः?
34. विज्ञानस्य प्रयोगः कुत्र करणीयः?

**पठितांश:**

**अधोदत्तं गद्यांशं, पद्यं च पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु-**

**गद्यांश:**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

**पूर्णवाक्येन उत्तरत-**

35. निर्धन: जनः कथं वित्तम् उपार्जितवान्?

36. निर्धनजनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः?

अधोदत्तं पद्यं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु।

**पद्यम्**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**पूर्णवाक्येन उत्तरत-**

37. पद्यानुसारेण प्रथमः धर्मः कः?

38. प्राणेभ्योऽपि कः रक्षणीयः?

**खण्डः – ग**

(3 **अङ्कीयाः प्रश्नाः)**

**निर्देशः - अस्मिन् खण्डे अष्टप्रश्नाः सन्ति। केचन षट्प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु-** 3 x 6 = 18

**39. अधोलिखितानाम् अव्ययानां सहायतया रिक्तस्थानानि पूरयत-**

अत्र, सदा, भृशम् ।

(क) इदानीं वायुमण्डलं .................... प्रदूषितमस्ति।

(ख) .................... जीवनं दुर्वहम् अस्ति।

(ग) .................... समयस्य सदुपयोगः करणीयः।

40**. 'क' स्तम्भे विशेषणपदं लिखितम्, 'ख स्तम्भे पुनः विशेष्यपदम्। तयोः मेलनं कुरुत -**

| क. | ख. |
|---|---|
| कश्चिद् | कृषिबलः |
| दुर्बलम् | कृषकः |

क्रुद्धः वृषभम्

**41. रेखाङ्कितपदमाधृत्य कोष्ठकात् उचितपदं चित्वा प्रश्न-निर्माणं कुरुत –**

क. कश्चन निर्धनो जनः **<u>परिश्रम्य</u>** वित्तमुपार्जितवान्। (केन,कथं,कः)

ख. ' तस्य पुत्रः **<u>छात्रावासे</u>** निवसन् अध्ययनं करोति स्म। (कुत्र,का,कम्)

ग. सः जनः **<u>पुत्रस्य</u>** रुग्णताम् आकर्ण्य व्याकुलो जातः। (कया, काम्, कस्य)

**42.अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्दं कोष्ठकात् चित्वा लिखत –**

क. पक्वः ----- (परिपक्वः, अपक्वः, क्वथितः)

ख. कातरः ----- (अधीरः, अकरुणः, अकातरः)

ग. कृतज्ञता ----- (उद्योगः, विलासिता, उद्विग्नता)

**43. कोष्ठकात् उचितसन्धिपदं चिनुत-**

क. मुनिः + अपि = ---- (मुनिरपि, मुनिअपि, मुनिपी)

ख. प्रकृतिः + एव = ---- (प्रकृतिएव, प्रकृतिरेव, प्रकृतिऐव)

ग. सत् + आचारः = ---- (सादचर, सताचारः, सदाचारः)

**44. कोष्ठकात् उचितम् अव्ययं चित्वा रिक्तस्थानानि पूरयत**-

(ह्यः, कुत्र, श्वः)

क. ---- सोमवासरः अस्ति.

ख. ---- रविवासरः आसीत्.

ग. त्वं ---- गच्छसि?

**45. मञ्जूषातः समुचितं कालबोधक-संस्कृत-शब्दं लिखत** -

क. माता प्रातः (5:30) -------- वादने उत्तिष्ठति।

ख. मोहनः सायं (6:15) ------- वादने क्रीडति।

ग. हेमा (1:45) ------- वादने भोजनं करोति।

मञ्जूषा- | पादोनद्वि, सार्धपञ्च, सपादषड् |

**46. अधोलिखितसंवादं मञ्जूषायां दत्तैः पदैः वाच्य-परिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत।**

देवः – रविकान्त! त्वं कुत्र गच्छसि?

रविकान्त: - मया तु आपणं (क) ------ ।

देवः – त्वं तत्र किमर्थं गच्छसि?

रविकान्तः – मया तत्र (ख) ------- क्रेतुं गम्यते।

देवः – त्वम् आपणात् कदा आगच्छसि?

रविकान्तः – मया आपणात् षड्वादने (ग) ------ ।

मञ्जूषा- | आगम्यते, फलानि, गम्यते |

**खण्डः - घ**

**(5 अङ्कीयाः प्रश्नाः)**

**निर्देशः- अस्मिन् खण्डे षड् प्रश्नाः सन्ति। केचन चतुर्णां प्रश्नानाम् उत्तरं ददातु।**

5 x 3 = 15

**47. श्लोकमेलनं कुरुत-**

क. यं यंपश्यसि तस्य तस्य पुरतो 　　　　 वने वसति चातकः.

ख. पिता यच्छति पुत्राय 　　　　 प्रजानां च हिते हितम्.

| | |
|---|---|
| ग. प्रजासुखे सुखं राज्ञः | बाल्ये विद्याधनं महत्. |
| घ. गुणी गुणं वेत्ति | न वेत्ति निर्गुणो. |
| ङ एक एव खगो मानी | मा ब्रूहि दीनं वचः |

**48. भवान् आदर्श-उच्चमाध्यमिकविद्यालयस्य छात्रः महेन्द्रः। स्वविद्यालयस्य प्रधानाचार्याय दिनद्वयस्य रुग्णावकाशाय लिखिते प्रार्थनापत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा प्रार्थनापत्रं पुनः लिखत।**

[महेन्द्रः, भवताम्, दिनद्वयस्य, रुग्णोऽस्मि, निवेदनम्, शिष्यः, विद्यालयः, स्वीकृत्य, आगन्तुं, अहं]

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,

आदर्श-उच्चमाध्यमिक-(i) ..........,

देवगृहम्।

विषयः - दिनद्वयस्य रुग्णावकाशार्थं प्रार्थनापत्रम्।

महोदयः!

उपर्युक्तविषयान्तर्गते (ii) .............. अस्ति यत् (iii) ......... गतदिवसात् अतीव (iv)......... । अतः अहं विद्यालय (v) ......... समर्थः नास्मि।

प्रार्थना अस्ति यत् 12/01/25 तः 13/01/25 दिनाङ्कपर्यन्तं (vi) .......... अवकाशं (vii) .......... माम् अनुग्रहीष्यन्ति।

दिनाङ्कः 11/01/25

(viii) .......... आज्ञाकारी (ix) ..........

(x) ..............

कक्षा-दशमी

**49. कोष्ठकात् चित्वा उचितक्रियापदेन रिक्तस्थानानि पूरयत**

क. अहं विद्यालयं ------। (गच्छति, गच्छामि, गच्छामः)

ख. सीता रामेण सह वनं ------। (गच्छति, गच्छतः, गच्छन्ति)

ग. ------- गृहं कदा गच्छसि? (अहं, वयं, त्वं)

घ. ते क्रीडाक्षेत्र ----- । (क्रीडति, क्रीडन्ति, क्रीडामि)

ङ. मोहनः श्वः विद्यालयं न ----- । (अगच्छत्, गच्छति, गमिष्यति)

**50. संस्कृते अनुवादं कुरुत - (केचन पञ्चानाम्)**

क. मैं पुस्तक पढ़ता हूँ।

ख. वे दोनों घर जाते हैं।

ग. यह मेरी पुस्तक है।

घ. यहाँ आओ।


ङ. तुम घर जाओ।

च. भारत हमारा देश है।

**51. अधोदत्तचित्रं दृष्ट्वा मञ्जूषासहायतया पञ्च वाक्यानि लिखत।**

मञ्जूषा-

| |
|---|
| बालकाः, दोलयन्ति, बालिका, मेलकम्, चिमटा, झुल्लिका, जनाः, वार्तालापं, क्रीडनकम्, दोलायाम्। |



**52. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत -**

क. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

ख. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

ग. मार्गे सा एकं व्याघ्रम् अपश्यत्।

घ. व्याघ्र दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

ङ. बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।